# shrIhanumataH AvaraNapUjA

# શ્રીહનુમતઃ આવરણપૂજા

## Document Information

Text title : hanumataHAvaraNapUjA

File name : hanumataHAvaraNapUjA.itx

Category : pUjA, hanumaana

Location : doc_hanumaana

Transliterated by : Shri Devi Kumar, refined by PSA Easwaran

Proofread by : PSA Easwaran

Description-comments : From Hanumatstutimanjari, Mahaperiaval Publication

Acknowledge-Permission: Mahaperiyaval Trust

Latest update : August 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 6, 2023

*sanskritdocuments.org*

shrIhanumataH AvaraNapUjA

# શ્રીહનુમતઃ આવરણપૂજા

જપઃ

ૐ અસ્ય શ્રીહનુમન્મન્ત્રસ્ય શ્રીરામચન્દ્ર ઋષિઃ । જગતીચ્છન્દઃ ।

હનુમાન્ દેવતા, હ્રૌં બીજં, હ્સ્ફ્રેં શક્તિઃ, હનુમતે કીલકમ્ ।

હનુમદ્દેવતાજપે વિનિયોગઃ ।

ન્યાસાઃ-

ઋષ્યાદિન્યાસઃ ।

શ્રીરામચન્દ્રઋષયે નમઃ શિરસિ ।

જગતીચ્છન્દસે નમઃ મુખે ।

હ્રૌં બીજાય નમઃ ગુહ્યે ।

હનુમતે કીલકાય નમો નાભૌ ।

વિનિયોગાય નમઃ અઞ્જલૌ ॥

કરન્યાસઃ (અઙ્ગન્યાસઃ) -

ૐ હ્રૌં અઙ્ગુષ્ઠાભ્યાં નમઃ (હૃદયાય નમઃ) ।

ૐ હ્ખ્ફ્રેં તર્જનીભ્યાં નમઃ (શિરસે સ્વાહા) ।

ૐ હ્ખ્ફ્રેં મધ્યમાભ્યાં નમઃ (શિખાયૈ વષટ્) ।

ૐ હ્સ્રૌં અનામિકાભ્યાં નમઃ (કવચાય હું) ।

ૐ હ્ખ્ફ્રેં કનિષ્ઠિકાભ્યાં નમઃ (નેત્રત્રયાય વૌષટ્) ।

ૐ હ્સૌં કરતલકરપૃષ્ઠાભ્યાં નમઃ (અસ્ત્રાય ફટ્) ।

મન્ત્રવર્ણવિન્યાસઃ

ૐ હ્રાંઐ નમઃ મૂર્ધ્નિ ।

ૐ હસ્ફ્રેં નમઃ લલાટે ।

ૐ ખ્ફ્રેં નમઃ નેત્રયોઃ ।

ૐ હ્સ્રૌં નમઃ મુખે ।

ૐ હ્સ્ખ્ફ્રેં નમઃ કણ્ઠે ।

ૐ હ્સૌં નમઃ બાહુમૂલે ।

ૐ હં નમઃ હૃદિ ।
ૐ નું નમઃ કુક્ષ્યોઃ ।
ૐ મં નમઃ નાભૌ ।
ૐ તેં નમઃ લિઙ્ગે ।
ૐ નં નમઃ જાનુનિ ।
ૐ મઃ નમઃ પાદયોઃ ।

પદન્યાસઃ
ૐ હ્રૌં નમઃ મૂર્ધ્નિ ।
ૐ હ્સ્ફ્રેં નમઃ લલાટે ।
ૐ ખ્ફ્રેં નમઃ મુખે ।
ૐ હ્સ્ત્રૌં નમઃ હૃદિ ।
ૐ હ્સ્ખ્ફ્રેં નમઃ નાભૌ ।
ૐ હ્સૌં નમઃ ઊરૌ ।
ૐ હનુમતે નમઃ જાનુનિ ।
ૐ નમઃ પાદયોઃ ।

ધ્યાનમ્
“બાલાર્કાયુતતેજસં ત્રિભુવનપ્રક્ષોભકં સુન્દરં
સુગ્રીવાદિસમસ્તવાનરગણૈરારાધિતં સાઞ્જલિમ્ ।
નાદેનૈવ સમસ્તરાક્ષસગણાન્ સન્ત્રાસયન્તં પ્રભું
શ્રીમદ્રામપદામ્બુજસ્મૃતિરતં ધ્યાયામિ વાતાત્મજમ્ ॥”

અગ્ન્યાધાનમ્ :- અગ્નૌ મારુતેરાવાહનમ્ । પ્રાણપ્રતિષ્ઠા ।
ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હં લં ક્ષં હં સઃ
સોહમ્ અસ્યાઃ શ્રીહનુમત્પ્રતિમાયાઃ પ્રાણાઃ ।
ૐ ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હં લં ક્ષં હં સઃ
સોહમ્ અસ્યાઃ શ્રીહનુમત્પ્રતિમાયાઃ જીવ ઇહ સ્થિતઃ ॥

ૐ આં હ્રીં ક્રોં યં રં લં વં શં ષં સં હં લં ક્ષં હં સઃ
સોહમ્ અસ્યાઃ શ્રીહનુમત્પ્રતિમાયા સર્વેન્દ્રિયાણિ
વાઙ્મનસ્ત્વક્ચક્ષુઃશ્રોત્રજિહ્વાઘ્રાણપાણિપાદપાયૂપસ્થાનિ
ઇહૈવાગત્ય સુખં ચિરં તિષ્ઠન્તુ સ્વાહા ॥

ગર્ભાધાનાદિ ષોડશસંસ્કારાન્સમ્પાદયામિ ।

આવાહનાદ્યુપચારાઃ
દેવેશ ભક્તિસુલભ પરિવારસમન્વિત ।
યાવત્ત્વાં પૂજયિષ્યામિ તાવદ્દેવ ઇહાવહ ।
આગચ્છ ભગવન્દેવ સ્થાને ચાત્ર સ્થિતો ભવ ।
યાવત્પૂજાં કરિષ્યામિ તાવત્ત્વં સન્નિધૌ ભવ ॥

“ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવતામાવાહયામિ” ।
“તવેયં મહિમા મૂર્તિસ્તસ્યાં ત્વાં સર્વગ પ્રભો ।
ભક્તિસ્નેહસમાકૃષ્ટ દીપવત્સ્થાપયામ્યહમ્ ॥”
“ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવ ઇહ તિષ્ઠ ।
“અનન્યા તવ દેવેશ મૂર્તિશક્તિરિયં પ્રભો ।
સાન્નિધ્યં કુરુ તસ્યાં ત્વં ભક્તાનુગ્રહતત્પર ॥”
(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવ ઇહ સન્નિધેહિ ।
“આજ્ઞયા તવ દેવેશ કૃપામ્ભોધે ગુણામ્બુધે ॥

આત્માનન્દૈકતૃપ્તં ત્વાં નિરુણધ્મિ પિતર્ગુરો ॥”
(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવ ઇહ સન્નિરુદ્ધો ભવ ।
“અજ્ઞાનાદ્દુર્મનસ્ત્વાદ્વા વૈકલ્યાત્સાધનસ્ય ચ ॥

યદપૂર્ણં ભવેત્કૃત્યં તદપ્યભિમુખો ભવ ॥”
(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવ ઇહ સમ્મુખો ભવ ॥

અભક્તવાઙ્મનશ્ચક્ષુઃશ્રોત્રદૂરાતિગદ્યુતે ॥

સ્વતેજઃપઞ્જરેણાશુ વેષ્ટિતો ભવ સર્વતઃ ॥

(મૂલં) ૐ ભુર્ભૂવઃસુવઃ શ્રીહનુમદ્દેવ અવગુણ્ઠિતો ભવ ॥

“યસ્ય દર્શનમિચ્છન્તિ દેવાઃ સ્વાભીષ્ટસિદ્ધયે ।
તસ્મૈ તે પરમેશાય સ્વાગતં ચ બ્રવીમિ તે ॥”
(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવાય નમઃ
સુસ્વાગતં સમર્પયામિ ।
“દેવ દેવ મહારાજરામચન્દ્રપ્રિયેશ્વર ।
આસનં દિવ્યમીશાન દાસ્યેઽહં પરમેશ્વર ॥

અપરાધો ભવત્યેવ સેવકસ્ય પદે પદે ॥

કોઽપરઃ સહતાં લોકે કેવલં સ્વામિનં વિના ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવાય નમઃ ।
આસનં સમર્પયામિ ।
સ્વાગતં દેવ દેવેશ મદ્ભાગ્યાત્ત્વમિહાગતઃ ।
પ્રાકૃતં ત્વં ચ દૃષ્ટ્વા માં બાલવત્પરિપાલય ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમદ્દેવતાયાં
પ્રાર્થનાં સમર્પયામિ, નમસ્કરોમિ ॥

પીઠપૂજા
“ઓં મણ્ડૂકાદિપરતત્વાન્તપીઠદેવતાઃ સ્થાપયેત્ ।
તથા ચ પુષ્પકેસરાક્ષતં દેવતાયાં અર્પયેત્ ।
ૐ મં મણ્ડૂકાય નમઃ । ૐ કાં કાલાગ્નિરુદ્રાય નમઃ ।
ૐ આં આધારશક્ત્યૈ નમઃ । ૐ કં કૂર્માય નમઃ ।
ૐ અં અનન્તાય નમઃ । ૐ પૃં પૃથિવ્યૈ નમઃ ।
ૐ ક્ષીં ક્ષીરસાગરાય નમઃ । ૐ રં રત્નદ્વીપાય નમઃ ।
ૐ રં રત્નમણ્ડપાય નમઃ । ૐ કં કલ્પવૃક્ષાય નમઃ ।
ૐ રં રત્નવેદિકાયૈ નમઃ । ૐ રં રત્નસિંહાસનાય નમઃ ।
(અગ્નિકોણે) -ૐ ધં ધર્માય નમઃ ।
(નૈરઋત્યે) -જ્ઞાં જ્ઞાનાય નમઃ ।
(વાયવ્યે) ૐ વૈં વૈરાગ્યાય નમઃ ।
(ઇશાને) ૐ ઐં ઐશ્વર્યાય નમઃ ।
(પૂર્વે) ૐ અં અધર્માય નમઃ ।
(દક્ષિણે) ૐ અં અજ્ઞાનાય નમઃ ।
(પશ્ચિમે) ૐ અં અવૈરાગ્યાય નમઃ ।
(ઉત્તરે) ૐ અં અનૈશ્વર્યાય નમઃ ।
(મધ્યે) ૐ સં સંવિન્નાલાય નમઃ ॥

ૐ સં સર્વતત્ત્વકમલાસનાય નમઃ ।
ૐ પ્રં પ્રકૃતિમયપત્રેભ્યો નમઃ ।
ૐ વિં વિકારમયકેસરેભ્યો નમઃ ।
ૐ પં પઞ્ચાશદ્વર્ણાઢ્યકર્ણિકાભ્યો નમઃ ॥

ૐ અં અર્કમણ્ડલાય દ્વાદશકલાત્મને નમઃ ।
ૐ સોં સોમમણ્ડલાય ષોડશકલાત્મને નમઃ ।

ॐ વં વહ્નિમણ્ડલાય દશકલાત્મને નમઃ ।
ॐ સં સત્ત્વાય નમઃ । ॐ રં રજસે નમઃ । ॐ તં તમસે નમઃ ।
ॐ આં આત્મને નમઃ । ॐ પં પરમાત્મને નમઃ ।
ॐ અં અન્તરાત્મને નમઃ । ॐ હ્રીં જ્ઞાનાત્મને નમઃ ।
ॐ મં માયાતત્ત્વાય નમઃ ।
ॐ કં કલાતત્ત્વાય નમઃ । ॐ વિં વિદ્યાતત્વાય નમઃ ।
ॐ પં પરતત્ત્વાય નમઃ ।
(એવં પીઠદેવતાઃ સમ્પૂજ્ય નવપીઠશક્તીઃ પૂજયેત્)
(પૂર્વે) ॐ વિમલાયૈ નમઃ ॥ (આગ્નેયે) ॐ ઉત્કર્ષિણ્યૈ નમઃ ।
(દક્ષિણે) ॐ જ્ઞાનાયૈ નમઃ ।
(નૈરૃત્યે) -ॐ ક્રિયાયૈ નમઃ ।
(પશ્ચિમે) -ॐ યોગાયૈ નમઃ । (વાયવ્યે) ॐ પ્રહ્વાયૈ નમઃ ।
(ઉત્તરે) -ઓં સત્યાયૈ નમઃ । (ઐશાન્યે) ॐ સત્યાયૈ નમઃ ।
(પીઠમધ્યે) - ॐ અનુગ્રહાયૈ નમઃ ।
ઇતિ પીઠશક્તીઃ સમ્પૂજ્ય, દેવાજ્ઞાં ગૃહીત્વા આવરણપૂજાં કુર્યાત્ ॥

તત્ર ક્રમઃ ॥

પુષ્પાઞ્જલિમાદાય
“સંવિન્મયપરો દેવ પરામૃત રસપ્રિય ।
અનુજ્ઞાં દેહિ હનુમન્ પરિવારાર્ચનાય મે” ॥ (પુષ્પાઞ્જલિઃ)

ષટ્કોણયન્ત્રપૂજા
(ષટ્કોણેષુ) ॐ હ્રૌં હૃદયાય નમઃ
હૃદયશ્રીપાદુકાં પૂજયામિ તર્પયામિ
નમઃ ।
ॐ હ્સ્ફ્રેં શિરસે સ્વાહા । શિરઃશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ ખ્ફ્રેં શિખાયૈ વષટ્ શિખાશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ હ્સ્રૌં કવચાય હું કવચશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ હસ્ખ્ફ્રેં નેત્રત્રયાય વૌષટ્ નેત્રત્રયશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં પ્રથમાવરણાર્ચનમ્ ॥

ઇતિ પુષ્પાઞ્જલિં દત્વા વિશેષાર્ઘ્યાદ્બિન્દું નિક્ષિપ્ય

પૂજિતાસ્તર્પિતાઃ સન્તુ ઇતિ વદેત્ । (તતોઽષ્ટદલે)
પૂજ્યપૂજકયોરન્તરાલં પ્રાચી । તદનુસારેણ અન્યા દિશઃ પ્રકલ્પ્ય
(દક્ષહસ્તે તર્જન્યઙ્ગુષ્ઠાભ્યાં ગન્ધાક્ષતપુષ્પાણિ ગૃહીત્વા,
પ્રાચ્યાદિક્રમેણ અષ્ટસુ દિક્ષુ ॥ )
પ્રાચ્યામ્ -
ૐ રામભક્તાય નમઃ રામભક્તશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ મહાબલાય નમઃ મહાબલ શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ દ્રોણાદ્રિહારકાય નમઃ દ્રોણાદ્રિહારક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ મેરુપીઠકાર્ચનકારણાય નમઃ મેરુપીઠકાર્ચનકારણ શ્રીપાદુકાં
પૂજયામિ તર્પયામિ નમઃ ॥

ૐ સર્વવિઘ્નનિવારકાય નમઃ સર્વવિઘ્નનિવારક શ્રીપાદુકાં પૂજયામિ
તર્પયામિ નમઃ ॥

(તતઃ પુષ્પાઞ્જલિમાદાય મૂલં પઠિત્વા વિશેષાર્ઘ્યાદ્બિન્દું દત્વા,
“અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
પૂજિતાસ્તર્પિતાઃ સન્તુ ઇતિ વદેત્ ।
તતઃ અષ્ટદલાદ્બહિઃ ચતુરશ્રાભ્યન્તરે પ્રાચ્યામ્ ।)
ૐ સુગ્રીવાય નમઃ સુગ્રીવશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ અઙ્ગદાય નમઃ અઙ્ગદશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ નીલાય નમઃ નીલશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ જામ્બવતે નમઃ જામ્બવત્શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ નલાય નમઃ નલશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ સુષેણાય નમઃ સુષેણશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ૐ દ્વિવિદાય નમઃ દ્વિવિદશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ॥

ૐ મૈન્દાય નમઃ મૈન્દશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
તતઃ પુષ્પાઞ્જલિમાદાય મૂલં પઠિત્વા
“અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં તૃતીયાવરણાર્ચનમ્ ॥

(ઇત્યુક્ત્વા પુષ્પાઞ્જલિં દત્વા વિશેષાર્ઘ્યાદ્બિન્દું દત્વા
પૂજિતાસ્તર્પિતાઃ સન્તુ ઇતિ વદેત્ ॥ )
(સન્ધિષુ પૂર્વાદિક્રમેણ)

ॐ રક્ષોઘ્નાય નમઃ રક્ષોઘ્નશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ વિષઘ્નાય નમઃ વિષનાશકશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ રિપુઘ્નાય નમઃ રિપુસંહારકશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ વ્યાધિઘ્નાય નમઃ વ્યાધિઘ્નશ્રીપાદુકામ્પૂજયામિ તર્પયામિ નમઃ ।
ॐ ચોરઘ્નાય નમઃ ચોરસંહારકશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ ભૂતઘ્નાય નમઃ ભૂતસંહારક શ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ પરશસ્ત્રાસ્ત્રમન્ત્રઘ્નાય નમઃ પરશસ્ત્રપરમન્ત્રનિવારકશ્રીપાદુકાં
પૂજયામિ તર્પયામિ નમઃ ।
ॐ ભયનાશાય નમઃ ભયનિવારકશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇતિ સમ્પૂજ્ય ।
પુષ્પાઞ્જલિમાદાય મૂલમુચ્ચાર્ય”
ॐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં ચતુર્થાવરણાર્ચનમ્ ।
ઇત્યુક્ત્વા પુષ્પાઞ્જલિં ચ દત્વા વિશેષાર્ઘ્યાદ્બિન્દું નિક્ષિપ્ય
પૂજિતાસ્તર્પિતાઃ સન્તુ - ઇતિ વદેત્ ॥

(ભૂપુરાદ્બહિઃ પ્રથમપઙ્ક્તૌ પૂર્વાદિક્રમેણ ॥ )
ॐ ઐરાવતાય નમઃ ઐરાવતશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ પુણ્ડરીકાય નમઃ પુણ્ડરીકશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ વામનાય નમઃ વામનશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ કુમુદાય નમઃ કુમુદશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ અઞ્જનાય નમઃ અઞ્જનશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ પુષ્પદન્તાય નમઃ પુષ્પદન્તશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ સાર્વભૌમાય નમઃ સાર્વભૌમશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ॥

ॐ સુપ્રતીકાય નમઃ સુપ્રતીકશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ॥

તતઃ પુષ્પાઞ્જલિમાદાય મૂલં પઠિત્વા
“અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં પઞ્ચમાવરણાર્ચનમ્ ॥ ”
ઇત્યુક્ત્વા પુષ્પાઞ્જલિં ચ દત્વા વિશેષાર્ઘ્યાદ્બિન્દું નિક્ષિપ્ય
“પૂજિતાસ્તર્પિતાઃ સન્તુ” ઇતિ વદેત્ ।
ભૂપુરાદિદ્વિતીયરેખાયાં પૂર્વાદિક્રમેણ-
પૂર્વે

ॐ લં ઇન્દ્રાય નમઃ ઇન્દ્રશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ॥

ॐ રં અગ્નયે નમઃ અગ્નિશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ॥

ॐ મં યમાય નમઃ યમશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ ક્ષં નિરૃર્તયે નમઃ નિરૃર્તિશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ વં વરુણાય નમઃ વરુણશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ યં વાયવે નમઃ વાયુશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ કં કુબેરાય નમઃ કુબેરશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ હં ઈશાનાય નમઃ ઈશાનશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇન્દ્રેશાનયોર્મધ્યે ।
ॐ આં બ્રહ્મણે નમઃ બ્રહ્મશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ॐ હ્રીં અનન્તાય નમઃ અનન્તશ્રીપાદુકાં પૂજયામિ તર્પયામિ નમઃ ।
ઇતિ દશ દિક્પાલાન્સમ્પૂજ્ય પુષ્પાઞ્જલિમાદાય મૂલમુચ્ચાર્ય ।
ॐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં ષષ્ઠમાવરણાર્ચનમ્ ॥

(ઇત્યુક્ત્વા પુષ્પાઞ્જલિં ચ દત્ત્વા, વિશેષાર્ઘ્યાદ્બિન્દું નિક્ષિપ્ય
"પૂજિતાસ્તર્પિતાઃ સન્તુ" ઇતિ વદેત્)
તતઃ પૂર્વાદિક્રમેણ તત્તત્સમીપે -
ॐ વં વજ્રાય નમઃ । ॐ શં શક્તયે નમઃ । ॐ દં દણ્ડાય નમઃ ।
ॐ ખં ખડ્ગાય નમઃ । ॐ પાં પાશાય નમઃ । ॐ અં અઙ્કુશાય નમઃ ।
ॐ ગં ગદાયૈ નમઃ । ॐ ત્રિં ત્રિશૂલાય નમઃ । ॐ પં પદ્માય નમઃ ।
ॐ ચં ચક્રાય નમઃ । ઇત્યસ્ત્રાણિ પૂજયેત્ ॥

તતઃ પુષ્પાઞ્જલિં ગૃહીત્વા મૂલમુચ્ચાર્ય્ય
"ॐ અભીષ્ટસિદ્ધિં મે દેહિ શરણાગતવત્સલ ।
ભક્ત્યા સમર્પયે તુભ્યં સપ્તમાવરણાર્ચનમ્ ॥

ઇત્યુક્ત્વા પુષ્પાઞ્જલિં ચ દત્વા વિશેષાર્ઘ્યાદ્બિન્દું નિક્ષિપ્ય
પૂજિતાસ્તર્પિતાઃ સન્તુ ઇતિ વદેત્ ॥ ઇત્યાવરણપૂજા ॥

ઉપચારાઃ
"યદ્ભક્તિલેશસમ્પર્કાત્પરમાનન્દસમ્ભવઃ ।
તસ્મૈ તે ચરણાબ્જાય પાદ્યં શુદ્ધાય કલ્પયે ॥"
(મૂલં)

“ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ પાદ્યં સમર્પયામિ ॥”
પાપત્રયહરં દિવ્યં પરમાનન્દલક્ષણમ્ ।
તાપત્રયવિનિર્મુક્તં તવાર્ઘ્યં કલ્પયામ્યહમ્ ॥

(મૂલમન્ત્રં પઠિત્વા)
ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ ઇદમર્ઘ્યં સમર્પયામિ ।
દેવાનામપિ દેવાય દેવાનાં દેવતાત્મને ॥”
આચામં કલ્પયામીશ શુદ્ધાનાં શુદ્ધિહેતવે ॥

(મૂલમન્ત્રં પઠિત્વા)
ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ આચમનીયં
સમર્પયામિ ॥

મધુપર્કપઞ્ચામૃતસ્નાનાદિ ચ સર્વં દેવોપયોગિપદ્ધતિમાર્ગેણ કુર્યાત્ ॥

અશક્તશ્ચેજ્જલસ્નાનં મધુસ્નાનં શુદ્ધોદકસ્નાનં ચ કુર્યાત્ ॥

“ગઙ્ગાસરસ્વતીરેવાપયોષ્ણીનર્મદાજલૈઃ ।
સ્નાપિતોઽસિ મયા દેવ તથા શાન્તિં કુરુષ્વ મે ॥

(મૂલં પઠિત્વા)
ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ જલસ્નાનં સમર્પયામિ ॥

”

તરુપુષ્પસમુદ્ભૂતં સુસ્વાદુ મધુરં મધુ ।
તેજઃપુષ્ટિકરં દિવ્યં સ્નાનાર્થં પ્રતિગૃહ્યતામ્ ॥

(મૂલં પઠિત્વા)
ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ મધુસ્નાનં સમર્પયામિ ।
ગઙ્ગા-સરસ્વતી-રેવા-પયોષ્ણી-નર્મદાજલૈઃ ।
સ્નાપિતોઽસિ મયા દેવ તથા શાન્તિં કુરુષ્વ મે ॥

(મૂલં)
ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ પુણ્યતીર્થસ્નાનં સમર્પયામિ ॥

સર્વભૂષાદિકસમે લોકલજ્જાનિવારણે ।
મયૈવાપાદિતે તુભ્યં વાસસી પ્રતિગૃહ્યતામ્ ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ વસ્ત્રં સમર્પયામિ ॥

નવભિસ્તન્તુભિર્યુક્તં ત્રિગુણં દેવતામયમ્ ।
ઉપવીતં ચોત્તરીયં ગૃહાણ પરમેશ્વર ॥

શ્રીહનુમતઃ આવરણપૂજા
(મૂલં)
ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ યજ્ઞોપવીતં ઉત્તરીયં ચ
સમર્પયામિ ॥

શ્રીખણ્ડં ચન્દનં દિવ્યં ગન્ધાઢ્યં સુમનોહરમ્ ।
વિલેપનં સુરશ્રેષ્ઠ ચન્દનં પ્રતિગૃહ્યતામ્ ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ ચન્દનં સમર્પયામિ ।
અક્ષતાશ્ચ સુરશ્રેષ્ઠ કુઙ્કુમાક્તાઃ સુશોભિતાઃ ।
મયા નિવેદિતા ભક્ત્યા ગૃહાણ પરમેશ્વર ।
(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ અક્ષતાન્સમર્પયામિ ॥

“માલ્યાદીનિ સુગન્ધીનિ માલત્યાદીનિ વૈ પ્રભો ।
મયાનીતાનિ પુષ્પાણિ ગૃહાણ પરમેશ્વર ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ પુષ્પાણિ સમર્પયામિ ॥

વનસ્પતિરસોદ્ભૂતો ગન્ધાઢ્યો ગન્ધ ઉત્તમઃ ।
આઘ્રેયઃ સર્વદેવાનાં ધૂપોઽયં પ્રતિગૃહ્યતામ્ ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ ધૂપં સમર્પયામિ ॥

“સુપ્રકાશો મહાદીપઃ સર્વતસ્તિમિરાપહઃ ।
સબાહ્યાભ્યન્તરં જ્યોતિર્દીપોઽયં પ્રતિગૃહ્યતામ્ ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ દીપં સમર્પયામિ ॥

સત્પાત્રસિદ્ધં સહવિર્વિવિધં સ્વાદુ ભક્ષણમ્ ।
નિવેદયામિ દેવેશ સાનુગાય ગૃહાણ તત્ ॥

(મૂલં) ૐ ભૂર્ભુવઃસુવઃ સાઙ્ગાય સપરિવારાય શ્રીહનુમતે નમઃ
નૈવેદ્યં સમર્પયામિ ॥

બ્રહ્મેશાદ્યૈઃ સરસમભિતઃ સૂપવિષ્ટૈઃ સમેતં
શિઞ્જદ્વાલવ્યજનનિકરૈર્વીજ્યમાનો ગણૌઘૈઃ ।
નર્મક્રીડા-પ્રહસનપરો હાસયન્ પઙ્ક્તિભોક્તૄન્,

ભુઙ્ક્તે પાત્રે કનકઘટિતે ષડ્રસાન્ વાયુપુત્રઃ ।
નમસ્તે દેવદેવેશ સર્વતૃપ્તિકરં પરમ્ ।
અખણ્ડાનન્દસમ્પૂર્ણં ગૃહાણ જલમુત્તમમ્ ।
(મૂલં) "ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ જલં સમર્પયામિ ।
અથ ધ્યાનમ્ -
બાલાર્કાયુતતેજસં ત્રિભુવનપ્રક્ષોભકં સુન્દરં
સુગ્રીવાદિસમસ્તવાનરગણૈરારાધિતં સાઞ્જલિમ્ ।
નાદેનૈવ સમસ્તરાક્ષસગણાન્ સન્ત્રાસયન્તં પ્રભું
શ્રીમદ્રામપદામ્બુજસ્મૃતિરતં ધ્યાયામિ વાતાત્મજમ્ ॥

અદ્યેહેત્યાદિ મમ (યજમાનસ્ય) સઙ્કલ્પોક્તફલાવાપ્તયે
શ્રીહનુમદ્દેવતાપુરશ્ચરણસિદ્ધ્યે, ચતુર્દિક્ષુ વટુકાદિદેવતાભ્યો
દધિમાષાન્નદ્રવ્યૈઃ પઞ્ચમહાભૂતબલિદાનં કરિષ્યે ।
"ૐ વટુકબલિપાત્રાધારમણ્ડલાય નમઃ"
"ૐ વઁ વટુકબલિદ્રવ્યાય નમઃ" ગન્ધપુષ્પાભ્યાં નમઃ ।
(પૂર્વે)
વઁ વટુકાય નમઃ, ૐ ઐં હ્રીં શ્રીં એહ્યેહિ દેવીપુત્ર વટુકનાથ
જટાભારભાસ્વર ત્રિનેત્ર જ્વાલામુખ સર્વવિઘ્નાન્નાશય નાશય
સર્વોપચારસહિતં ઇમં બલિં ગૃહાણ ગૃહાણ સ્વાહા ॥

પ્રાર્થના
ૐ કરકલિતકપાલઃકુણ્ડલીદણ્ડપાણિઃ
તરુણતિમિરનીલવ્યાલયજ્ઞોપવીતી ।
ઋતુસમયસપર્યાવિઘ્નવિચ્છેદહેતુઃ
જયતિ વટુકનાથઃ સિદ્ધિદઃ સાધકાનામ્ ॥

બલિદાનેન સન્તુષ્ટો વટુકઃ સર્વસિદ્ધિદઃ ।
શાન્તિં કરોતુ મે નિત્યં ભૂતવેતાલસેવિતઃ ॥

(પુષ્પાઞ્જલિં કુર્યાત્)

(ઉત્તરે) ૐ ગં ગણપતયે નમઃ ગણેશબલિપાત્રાધારમણ્ડલાય નમઃ ।
(તત્પશ્ચાત્)
ૐ ગણેશબલિદ્રવ્યાય નમઃ । ૐ ગાં ગીં ગૂં ગૈં ગૌં ગઃ
ગણપતયે વરવરદ સર્વજનં મે વશમાનય સર્વોપચારસહિતં

બલિં ગૃહ્ણ-ગૃહ્ણ સ્વાહા ।
સર્વદા સર્વકાર્યાણિ નિર્વિઘ્નં સાધયેન્મમ ।
શાન્તિં કરોતુ સતતં વિઘ્નરાજઃ સશક્તિકઃ ।
(ઉત્તરસ્યાં) “યોગિનીબલિપાત્રાધારમણ્ડલાય નમઃ”
“ૐ યાં યોગિનીબલિદ્રવ્યાય નમઃ” દક્ષિણે યાં સર્વયોગિનીભ્યો નમઃ ।
ૐ સર્વવર્ણયોગિન્યઃ ઇમં બલિં ગૃહ્ણન્તુ ગૃહ્ણન્તુ હું ફટ્ સ્વાહા ।
ૐ ઊર્ધ્વં બ્રહ્માણ્ડતો વા દિવિ ગગનતલે ભૂતલે નિષ્કલે વા
પાતાલે વા સ્થલે વા સલિલપવનયોર્યત્ર કુત્ર સ્થિતા વા ।
ક્ષેત્રે પીઠોપપીઠે દિશિ દિશિ ચ કૃતે ધૂપદીપાદિકેભ્યઃ
પ્રીતા દેવ્યઃ સદા નઃ શુભવિધિબલિનઃ પાન્તુ વીરેન્દ્રવન્દ્યાઃ ॥

યા કાચિદ્યોગિની રૌદ્રા સૌમ્યા ઘોરા પરાત્પરા ।
ખેચરી ભૂચરી વ્યોમવત્યઃ પ્રીતાસ્તુ મે સદા ॥

યાં યોગિનીભ્યઃ સ્વાહા સર્વાભ્યો યોગિનીભ્યઃ ફટ્ ॥ (પુષ્પાઞ્જલિઃ)
(પશ્ચિમાયાં) “ક્ષેત્રપાલબલિપાત્રાધારમણ્ડલાય નમઃ ॥

“ૐ ક્ષં ક્ષેત્રપાલબલિદ્રવ્યાય નમઃ” “પશ્ચિમે ક્ષં ક્ષેત્રપાલાય નમઃ ॥

ક્ષાં ક્ષીં ક્ષૂં ક્ષૈં ક્ષૌં ક્ષઃ ભો સ્થાનક્ષેત્રપાલ ઇમં બલિં ગૃહાણ
સર્વકાર્યાણિ પૂરય પૂરય સ્વાહા ॥”
યોઽસ્મિન્ ક્ષેત્રે નિવાસી ચ ક્ષેત્રપાલઃ સકિઙ્કરઃ ।
પ્રીતોઽયં બલિદાનેન સર્વરક્ષાં કરોતુ મે ॥

“હ્રીં સર્વભૂતવિઘ્નકૃદ્બલિપાત્રાધારમણ્ડલાય નમઃ ।”
“સર્વભૂતવિઘ્નકૃદ્બલિદ્રવ્યાય નમઃ ।”
“ૐ હ્રીં સર્વવિઘ્નકૃદ્ભ્યઃ સર્વભૂતેભ્યઃ ઇમં બલિં ગૃહ્ણન્તુ ગૃહ્ણન્તુ
હું ફટ્ સ્વાહા ॥

ભૂતા યે વિઘ્નકર્તારઃ દિવિ ભૂમ્યન્તરિક્ષગાઃ ।
પાતાલસ્થલસંસ્થાશ્ચ શિવયોગેન ભાવિતાઃ ।
ક્રૂરાદ્યાઃ શતસઙ્ખ્યાકાઃ પાખણ્ડાદ્યા વ્યવસ્થિતાઃ ।
ધ્રુવાદ્યાઃ સત્યસઙ્ખ્યાશ્ચ ઇન્દ્રાદ્યાશાવ્યવસ્થિતાઃ ।
તૃપ્યન્તુ પ્રીતમનસો ભૂતા ગૃહ્ણન્ત્વિમં બલિમ્ ।
નગરે વાથ સઙ્ગ્રામે અટવ્યાં વૈ સરિત્તટે ॥

વાપીકૂપેષુ વૃક્ષેષુ શ્મશાને ચ ચતુષ્પથે ।

નાનારૂપધરા યે ચ બહુરૂપધરાશ્ચ યે ।
તે સર્વે ચૈવ સન્તુષ્ટા બલિં ગૃહ્ણન્તુ મે સદા ॥

શ્રીદ્વાદશાક્ષરહનુમન્મત્રસ્ય શ્રીરામચન્દ્રસ્ય ઋષેઃ બલિપાત્રાધાર-
મણ્ડલાય નમઃ (મૂલં મન્ત્રમુચ્ચાર્ય) "શ્રીરામચન્દ્રઋષયે ઇમં
બલિં ગૃહાણ ગૃહાણ સ્વાહા ॥"
(મૂલમન્ત્રં પઠિત્વા) "ઓં (મૂલં) હનુમદ્દેવતાબલિદ્રવ્યાય નમઃ"
"ૐ (મૂલં) સાઙ્ગાયૈ સાયુધાયૈ સવાહનાયૈ સપરિવારાયૈ સશક્તિકાયૈ
શ્રીહનુમદ્દેવતાયૈ નમઃ ।
ૐ (મૂલં) ચણ્ડેશ્વરાય નમઃ ધૂં ફટ્ ચણ્ડેશ્વરાય ઇમં બલિં
ગૃહાણ ગૃહાણ સ્વાહા ॥"
ચણ્ડેશ્વરં રક્તતનું ત્રિનેત્રં રક્તાંશુકાઢ્યં હૃદિ ભાવયામિ ।
ટઙ્કં ત્રિશૂલં સ્ફટિકાક્ષમાલાં કમણ્ડલું બિભ્રતમિન્દુચૂડમ્ ॥

"કદલીગર્ભસમ્ભૂતં કર્પૂરં ચ પ્રદીપિતમ્ ।
આરાત્રિકમહં કુર્વે પશ્ય મે વરદો ભવ ॥"
(મૂલં) "ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ કર્પૂરારાત્રિકં સમર્પયામિ ।
યાનિ કાનિ ચ પાપાનિ જન્માન્તરકૃતાનિ વૈ ।
તાનિ સર્વાણિ નશ્યન્તુ પ્રદક્ષિણપદે પદે ॥

ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ પ્રદક્ષિણં સમર્પયામિ ॥

"નાનાસુગન્ધપુષ્પાણિ યથાકાલોદ્ભવાનિ ચ ।
પુષ્પાજલિં મયા દત્તં ગૃહાણ પરમેશ્વર ॥

ૐ ભૂર્ભુવઃસુવઃ શ્રીહનુમતે નમઃ । પુષ્પાઞ્જલિં સમર્પયામિ ॥

યદુક્તં હૃદિ ભાવેન પત્રં પુષ્પં ફલં જલમ્ ।
નિવેદિતં ચ નૈવેદ્યં ગૃહાણ ત્વનુકમ્પયા ॥

"અનયા કૃતયા પૂજયા શ્રીહનુમદ્દેવતા પ્રીયતાં ઇદં ન મમ ।"
પરિવારપૂજા -
ૐ ભૂર્ભુવઃસુવઃ શ્રીરામચન્દ્રઋષયે સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ હ્રૌં સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ હ્સ્ફ્રેંઐં સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ ખ્ફ્રેં સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ હ્સ્રૌં સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ હ્સ્ખ્ફ્રેં સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ હ્સૌં સ્વાહા ।
ૐ ભૂર્ભુવઃ સુવઃ રામભક્તાય સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ મહાતેજસે સ્વાહા ।

ૐ ભૂર્ભુવઃસુવઃ કપિરાજાય સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ મહાબલાય સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ દ્રોણાદ્રિહારકાય સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ મેરુપીઠકાર્ચનકારકાય સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ દક્ષિણાશાભાસ્કરાય સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ સર્વવિઘ્નનિવારકાય સ્વાહા ।
ૐ ભૂર્ભુવઃ સુવઃ સુગ્રીવાય સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ અઙ્ગદાય સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃનીલાય સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ જામ્બવતે સ્વાહા ।
ૐ ભૂર્ભુવઃસુવઃ નલાય સ્વાહા । ૐ ભૂર્ભુવઃસુવઃ સુષેણાય સ્વાહા ।
ૐ ભૂર્ભુવઃ સુવઃ દ્વિવિદાય સ્વાહા । ૐ ભૂભુવઃ સુવઃ મૈન્દાય સ્વાહા ॥

ૐ તત્સદ્બ્રહ્માર્પણમસ્તુ ।

---

From Hanumatstutimanjari, Mahaperiaval Publication

Proofread by PSA Easwaran psaeaswaran at gmail

---

*shrIhanumataH AvaraNapUjA*

pdf was typeset on August 6, 2023

Please send corrections to *sanskrit@cheerful.com*